कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥ अथ तृतीय काण्डे पञ्चमः प्रश्नः॥

हरिः ओम्॥ पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय। तस्यां देवा अधि संवसन्त उत्तमे नाक इह मादयन्ताम्॥ यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा। सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम्॥ निवेशनी सङ्गमनी वसूनां विश्वा रूपाणि वसून्यावेशयन्ती। सहस्रपोषगं सुभगा राराणा सा न आ गन्वर्चसा [१] संविदाना॥ अग्नीषोमौ प्रथमौ वीर्येण वसून्रुद्रानादित्यानिह जिन्वतम्। माध्यगं हि पौर्णमासं जुषेथां ब्रह्मणा वृद्धौ सुकृतेन सातावथाऽस्मभ्यगं सहवीरागं रयिं नि यच्छतम्॥ आदित्याश्चाऽङ्गिरसश्चाऽग्नीनाऽदधत ते दर्शपूर्णमासौ प्रैप्सन्तेषामङ्गिरसां निरुप्तगं हविरासीदथाऽऽदित्या एतौ होमावपश्यन्तावजुहवुस्ततो वै ते दर्शपूर्णमासौ [२] पूर्व आऽलभन्त दर्शपूर्णमासावालभमान एतौ होमौ पुरस्ताज्जुहुयाथ्साक्षादेव दर्शपूर्णमासावा लभते ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासावा लभेत य एनयोरनुलोमं च प्रतिलोमं च विद्यादित्यिमावास्याया ऊर्ध्वं तदनुलोमं पौर्णमास्यै प्रतीचीनं तत्प्रतिलोमं यत्पौर्णमासीं पूर्वामालभेत प्रतिलोममेनावा लभेताऽमुमपक्षीयमाणमन्वप [३] क्षीयेत सारस्वतौ होमौ पुरस्ताज्जुहुयादमावास्या वै सरस्वत्यनुलोममेवैनावा लभतेऽमुमाप्यायमानमन्वा प्यायत आग्नावैष्णवमेकादशकपालं पुरस्तान्निर्वपेथ्सरस्वत्यै चरुगं सरस्वते द्वादशकपालं यदाग्नेयो भवत्यग्निर्वै

यज्ञमुखं यज्ञमुखमेवर्धिं पुरस्ताद्धत्ते यद्वैष्णवो भवति यज्ञो वै विष्णुर्यज्ञमेवारभ्य प्र तनुते सरस्वत्यै चरुर्भवति सरस्वते द्वादशकपालोऽमावास्या वै सरस्वती पूर्णमासः सरस्वान्तावेव साक्षादा रभत ऋध्नोत्याभ्यां द्वादशकपालः सरस्वते भवति मिथुनत्वाय प्रजात्यै मिथुनौ गावौ दक्षिणा समृद्ध्यै॥[४]

वर्चसा वै ते दर्शपूर्णमासावप तनुते सरस्वत्यै पञ्चविग्ंशतिश्च ||3.5.1||

ऋषयो वा इन्द्रं प्रत्यक्षं नाऽपश्यन्तं वसिष्ठः प्रत्यक्षमपश्यथ्सोऽब्रवीद्ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः प्रजनिष्यन्तेऽथ मेतरेभ्य ऋषिभ्यो मा प्र वोच इति तस्मा एतान्थ्सोमभागानब्रवीत्ततो वसिष्ठपुरोहिताः प्रजाः प्राऽजायन्त तस्माद्वासिष्ठो ब्रह्मा कार्यः प्रैव जायते रश्मिरसि क्षयाय त्वा क्षयं जिन्वे– [५] त्याह देवा वै क्षयो देवेभ्य एव यज्ञं प्राऽऽह प्रेतिरसि धर्माय त्वा धर्मं जिन्वेत्याह मनुष्या वै धर्मो मनुष्येभ्य एव यज्ञं प्राऽऽहाऽन्वितिरसि दिवे त्वा दिवं जिन्वेत्याहैभ्य एव लोकेभ्यो यज्ञं प्राऽऽह विष्टं भोऽसि वृष्ट्यै त्वा वृष्टिं जिन्वेत्याह वृष्टिमेवाऽव [६] रुन्धे प्रवाऽस्यनुवाऽसीत्याह मिथुनत्वायोशिगसि वसुभ्यस्त्वा वसून्जिन्वेत्याहाऽष्टौ वसव एकादश रुद्रा द्वादशाऽऽदित्या एतावन्तो वै देवास्तेभ्य एव यज्ञं प्राऽऽहौजोऽसि पितृभ्यस्त्वा पितृञ्जिन्वेत्याह देवानेव पितृननु सं तनोति तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्वे– [७] त्याह पितृनेव प्रजा अनु सं तनोति पृतनाषाडसि पशुभ्यस्त्वा पशून्जिन्वेत्याह प्रजा एव पशूननु सं तनोति रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वेत्याहौषधीष्वेव पशून्प्रति ष्ठापयत्यभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वेत्याहाभिजित्या अधिपतिरसि प्राणाय त्वा प्राणं [८]

जिन्वेत्याह प्रजास्वेव प्राणान्दधाति त्रिवृदसि प्रवृदसीत्याह मिथुनत्वाय सग्ंरोहोऽसि नीरोहोऽसीत्याह प्रजात्यै वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीत्याह प्रतिष्ठित्यै॥[९]

जिन्वेत्यव प्रजा जिन्व प्राणं त्रिग्ंशच्च॥3.5.2॥

अग्निना देवेन पृतना जयामि गायत्रेण छन्दसा त्रिवृता स्तोमेन रथन्तरेण साम्ना वषट्कारेण वज्रेण पूर्वजान् भ्रातृव्यानधरान्पादयाम्यवैनान् बाधे प्रत्येनान्नुदेऽस्मिन् क्षयेऽस्मिन्भूमिलोके योऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः क्रमेणाऽत्येनान् क्रामामीन्द्रेण देवेन पृतना जयामि त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना वषट्कारेण वज्रेण [१०] सहजान्विश्वेभिर्देवेभिः पृतना जयामि जागतेन छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणाऽपरजानिन्द्रेण सयुजो वयग्ं सासह्याम पृतन्यतः। घ्नन्तो वृत्राण्यप्रति। यत्ते अग्ने तेजस्तेनाऽहं तेजस्वी भूयासं यत्ते अग्ने वर्चस्तेनाऽहं वर्चस्वी भूयासं यत्ते अग्ने हरस्तेनाऽहग्ं हरस्वी भूयासम्॥[११]

बृहता साम्ना वषट्कारेण वज्रेण षट्चत्वारिग्ंशच्च॥3.5.3॥

ये देवा यज्ञहनो यज्ञमुषः पृथिव्यामध्यासते। अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम्॥ आऽगन्म मित्रावरुणा वरेण्या रात्रीणां भागो युवयोर्यो अस्ति। नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः॥ ये देवा यज्ञहनो यज्ञमुषोऽन्तरिक्षेऽध्यासते। वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम्॥ यास्ते रात्रीः सवित- [१२] र्देवयानीरन्तरा द्यावापृथिवी वियन्ति। गृहैश्च सर्वैः प्रजयान्वग्रे सुवो

रुहाणास्तरता रजाग्ंसि॥ ये देवा यज्ञहनो यज्ञमुषो दिव्यध्यासते। सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम्॥ येनेन्द्राय समभरः पयाग्स्युत्तमेन हविषा जातवेदः। तेनाऽग्ने त्वमुत वर्धयेमग्ं सजातानाग् श्रैष्ठ्य आ धेह्येनम्॥ यज्ञहनो वै देवा यज्ञमुषः [१३] सन्ति त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते तस्य। ये देवा यज्ञहनः पृथिव्यामध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोकाग् स्तीर्त्वा सगृहः सपशुः सुवर्गं लोकमेत्यप वै सोमेनेजानाद्देवताश्च यज्ञश्च क्रामन्त्याग्नेयं पञ्चकपालमुदवसानीयं निर्वपेदग्निः सर्वा देवताः [१४] पाङ्क्तो यज्ञो देवताश्चैव यज्ञं चाऽव रुन्धे गायत्रो वा अग्निर्गायत्रछन्दास्तं छन्दसा व्यर्धयति यत्पञ्चकपालं करोत्यष्टाकपालः कार्योऽष्टाक्षरा गायत्री गायत्रोऽग्निर्गायत्र छन्दाः स्वेनैवैनं छन्दसा समर्धयति पङ्क्त्यौ याज्यानुवाक्ये भवतः पाङ्क्तो यज्ञस्तेनैव यज्ञान्नैति॥[१५]

सवितर्देवा यज्ञमुषस्सर्वा देवतास्त्रिचत्वारिग्ंशच्च॥3.5.4॥

सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्यजमानोऽग्निर्मा पातु चक्षुषः। सक्ष शूष सवितर्विश्वचर्षण एतेभिः सोम नामभिर्विधेम ते तेभिः सोम नामभिर्विधेम ते। अहं परस्तादहमवस्तादहं ज्योतिषा वि तमो ववार। यदन्तरिक्षं तदु मे पिताऽभूदहग्ं सूर्यमुभयतो ददर्शाऽहं भूयासमुत्तमः समानाना– [१६] मा समुद्रादाऽन्तरिक्षात्प्रजापतिरुदधिं च्यावयातीन्द्रः प्र स्नौतु मरुतो वर्षयन्त्वूनं भय पृथिवीं भिन्धीदं दिव्यं नभः। उद्नो दिव्यस्य नो देहीशानो वि सृजा दृतिम्॥ पशवो वा एते यदादित्य एष रुद्रो यदग्निरोषधीः प्रास्याऽग्नावादित्यं जुहोति रुद्रादेव

पशूनन्तर्दधात्यथो ओषधीष्वेव पशून् [१७] प्रति ष्ठापयति कविर्यज्ञस्य वि तनोति पन्थां नाकस्य पृष्ठे अधि रोचने दिवः। येन हव्यं वहसि यासि दूत इतः प्रचेता अमुतः सनीयान्॥ यास्ते विश्वाः समिधः सन्त्यग्ने याः पृथिव्यां बर्हिषि सूर्ये याः। तास्ते गच्छन्त्वाहुतिं घृतस्य देवायते यजमानाय शर्म॥ आशासानः सुवीर्यग्ं राय स्पोषग्ग् स्वश्चियम्। बृहस्पतिना रायास्वगाकृतो मह्यं यजमानाय तिष्ठ॥[१८]

समानानामोषधीष्वेव पशून्मह्यं यजमानायैकं च॥3.5.5॥

सं त्वा नह्यामि पयसा घृतेन सं त्वा नह्याम्यप ओषधीभिः। सं त्वा नह्यामि प्रजयाऽहमद्य सा दीक्षिता सनवो वाजमस्मे॥ प्रैतु ब्रह्मणस्पत्नी वेदिं वर्णेन सीदतु। अथाऽहमनुकामिनी स्वे लोके विशा इह। सुप्रजसस्त्वा वयग्ं सुपत्नीरुप सेदिम। अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्॥ इमं विष्यामि वरुणस्य पाशं [११] यमबध्नीत सविता सुकेतः। धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि॥ प्रेह्युदेह्यृतस्य वामीरन्वग्निस्तेऽग्रं नयत्वदितिर्मध्यं ददताग्ं रुद्रावसृष्टासि युवा नाम मा मा हिग्ंसीर्वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो वो देवेभ्यः पत्नेजनीर्गृह्णामि यज्ञाय वः पत्नेजनीः सादयामि विश्वस्य ते विश्वावतो वृष्णियावत– [२०] स्तवाऽग्ने वामीरनु संदृशि विश्वा रेताग्ंसि धिषीयाऽगन्देवान् यज्ञो नि देवीर्देवेभ्यो यज्ञमशिषन्नस्मिन्थ्सुन्वति यजमान आशिषः स्वाहाकृताः समुद्रेष्ठा गन्धर्वमा तिष्ठतानु। वातस्य पत्मन्निड ईडिताः॥[२१]

पाशं वृष्णियावतस्त्रिग्ं शच्च॥3.5.6॥

वषट्कारो वै गायत्रियै शिरोऽच्छिनत्तस्यै रसः पराऽपतथ्स पृथिवीं प्राऽविशथ्स खदिरोऽभवद्यस्य खादिरः स्रुवो भवति छन्दसामेव रसेनाऽव द्यति सरसा अस्याऽऽहुतयो भवन्ति तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याऽहरत्तस्य पर्णमच्छिद्यत तत्पर्णोऽभवत्तत्पर्णस्य पर्णत्वं यस्य पर्णमयी जुहू- [२२] र्भवति सौम्या अस्याऽऽहुतयो भवन्ति जुषन्तेऽस्य देवा आहुतीर्देवा वै ब्रह्मन्नवदन्त तत्पर्ण उपाऽशृणोथ्सुश्रवा वै नाम यस्य पर्णमयी जुहूर्भवति न पापग्ग् श्लोकग्ं शृणोति ब्रह्म वै पर्णो विण्मरुतोऽन्नं विण्मारुतोऽश्वत्थो यस्य पर्णमयी जुहूर्भवत्याश्वत्थ्युपभृद्ब्रह्मणैवान्नमव रुन्धेऽथो ब्रह्मौ- [२३] व विश्यध्यूहति राष्ट्रं वै पर्णो विडश्वत्थो यत्पर्णमयी जुहूर्भवत्याश्वत्थ्युपभृद्राष्ट्रमेव विश्यध्यूहति प्रजापतिर्वा अजुहोथ्सा यत्राऽऽहुतिः प्रत्यतिष्ठत्ततो विकङ्कत उदतिष्ठत्ततः प्रजा असृजत यस्य वैकङ्कती ध्रुवा भवति प्रत्येवाऽस्याऽऽहुतयस्तिष्ठन्त्यथो प्रैव जायत एतद्वै स्रुचाग्ं रूपं यस्यैवग्ं रूपाः स्रुचो भवन्ति सर्वाण्येवैनग्ं रूपाणि पशूनामुप तिष्ठन्ते नाऽस्याऽपरूपमात्मञ्जायते॥[२४]

जुहूरथो ब्रह्म स्रुचाग्ं सप्तदश च॥3.5.7॥

उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दक्षाय दक्षवृधे रातं देवेभ्योऽग्निजिह्वेभ्यस्त्वर्तायुभ्य इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः पर्जन्यात्मभ्यो दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वाऽपेन्द्र द्विषतो मनोऽप जिज्यासतो जह्यप यो नोऽरातीयति तं जहि प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा सते त्वासते त्वाऽद्भ्यस्त्वौषधीभ्यो विश्वेभ्यस्त्वा भूतेभ्यो यतः प्रजा अक्खिद्रा अजायन्त तस्मै

त्वा प्रजापतये विभूदाव्न्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि॥[२५]

ओषधीभ्यश्चतुर्दश च॥3.5.8॥

यां वा अध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आ वृश्च्येते प्राजापत्यं दधिग्रहं गृह्णीयात्प्रजापतिः सर्वा देवता देवताभ्य एव नि ह्नुवाते ज्येष्ठो वा एष ग्रहाणां यस्यैष गृह्यते ज्यैष्ठ्यमेव गच्छति सर्वासां वा एतद्देवतानाग्ं रूपं यदेष ग्रहो यस्यैष गृह्यते सर्वाण्येवैनग्ं रूपाणि पशूनामुप तिष्ठन्त उपयामगृहीतो- [२६] ऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामीत्याह ज्योतिरेवैनग्ं समानानां करोत्यग्निजिह्वेभ्यस्त्वर्तायुभ्य इत्याहैतावतीर्वै देवतास्ताभ्य एवैनग्ं सर्वाभ्यो गृह्णात्यपेन्द्र द्विषतो मन इत्याह भ्रातृव्यापनुत्त्यै प्राणाय त्वाऽपानाय त्वेत्याह प्राणानेव यजमाने दधाति तस्मै त्वा प्रजापतये विभूदाव्न्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमी- [२७] त्याह प्रजापतिः सर्वा देवताः सर्वाभ्य एवैनं देवताभ्यो जुहोत्याज्यग्रहं गृह्णीयात्तेजस्कामस्य तेजो वा आज्यं तेजस्व्येव भवति सोमग्रहं गृह्णीयाद्ब्रह्मवर्चसकामस्य ब्रह्मवर्चसं वै सोमो ब्रह्मवर्चस्येव भवति दधिग्रहं गृह्णीयात्पशुकामस्योग्वै दध्यूर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्धे॥[२८]

उपयामगृहीतो जुहोमि त्रिचत्वारिग्ंशच्च॥3.5.9॥

त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः। स्वादोः स्वादीयः स्वादुना सृजा समत ऊ षु मधु मधुनाऽभि योधि॥ उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा। प्राणग्रहान् गृह्णात्येतावद्वा अस्ति यावदेते ग्रहाः

स्तोमाश्छन्दाग्ंसि पृष्ठानि दिशो यावदेवाऽस्ति त- [२९] दव रुन्धे ज्येष्ठा वा एतान् ब्राह्मणाः पुरा विद्वामक्रन्तस्मात्तेषाग्ं सर्वा दिशोऽभिजिता अभूवन् यस्यैते गृह्यन्ते ज्यैष्ठ्यमेव गच्छत्यभि दिशो जयति पञ्च गृह्यन्ते पञ्च दिशः सर्वास्वेव दिक्ष्वृध्नुवन्ति नवनव गृह्यन्ते नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधति प्रायणीये चोदयनीये च गृह्यन्ते प्राणा वै प्राणग्रहाः [३०] प्राणैरेव प्र यन्ति प्राणैरुद्यन्ति दशमेऽहन् गृह्यन्ते प्राणा वै प्राणग्रहाः प्राणेभ्यः खलु वा एतत्प्रजा यन्ति यद्वामदेव्यं योनेश्च्यवते दशमे ऽहन्वामदेव्यं योनेश्च्यवते यद्दशमेऽहन् गृह्यन्ते प्राणेभ्य एव तत्प्रजा न यन्ति॥[३१]

तत्प्राण ग्रहास्सप्तत्रिग्ंशच्च॥3.5.10॥

प्र देवं देव्या धिया भरता जातवेदसम्। हव्या नो वक्षदानुषक्॥ अयमु ष्य प्र देववुर्होता यज्ञाय नीयते। रथो न योरभीवृतो घृणीवाञ्चेतति त्मना॥ अयमग्निरुरुष्यत्यमृतादिव जन्मनः। सहसश्चिथ्सहीयान्देवो जीवातवे कृतः॥ इडायास्त्वा पदे वयं नाभा पृथिव्या अधि। जातवेदो नि धीमह्यग्ने हव्याय वोढवे [३२] अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम्। कुलायिनं घृतवन्तग्ं सवित्रे यज्ञं नय यजमानाय साधु॥ सीद होतः स्व उ लोके चिकित्वान्थ्सादया यज्ञग्ं सुकृतस्य योनौ। देवावीर्देवान् हविषा यजास्यग्ने बृहद्यजमाने वयो धाः॥ नि होता होतृषदने विदानस्त्वेषो दीदिवाग्ं असदथ्सुदक्षः। अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रं भरः शुचिजिह्वो अग्निः॥ त्वं दूतस्त्व- [३३] मु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता। अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि

गोपाः॥ अभि त्वा देव सवितरीशानं वार्याणाम्। सदाऽवन्भागमीमहे॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः॥ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः॥ तमु [३४] त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः। वृत्रहणं पुरन्दरम्॥ तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनञ्जयग्ं रणेरणे॥ उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाऽजनि। धनञ्जयो रणेरणे॥ आ यग्ं हस्ते न खादिनग्ं शिशुं जातं न बिभ्रति। विशामग्निग्ग् स्वध्वरम्॥ प्र देवं देववीतये भरता वसुवित्तमम्। आ स्वे योनौ नि षीदतु॥ आ [३५] जातं जातवेदसि प्रियग्ं शिशीताऽतिथिम्। स्योन आ गृहपतिम्॥ अग्निनाऽग्निः समिध्यते कविर्गृहपतिर्युवा। हव्यवाड्जुह्वास्यः॥ त्वग्ग् ह्यग्ने अग्निना विप्रो विप्रेण सन्थ्सता। सखा सख्या समिध्यसे॥ तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु। स्वेषु क्षयेषु वाजिनम्॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः॥[३६]

वोढवे दूतस्त्वं तमुसीदत्वा यत्र चत्वारि च||3.5.11||

पूर्ण ऋषयोऽग्निना ये देवास्सूर्या मा सं त्वा नह्यामि वषट्कारस्स खदिर उपयामगृहीतोऽसि यां वै त्वे क्रतुं प्र देवमेकादश||11||

पूर्णा सहजान्तवाऽग्ने प्राणैरेव षट्त्रिग्ंशत्॥३६॥

पूर्णा सन्ति देवाः॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति तृतीयकाण्डे पञ्चमः प्रश्नः॥

॥तृतीयकाण्डः समाप्तः॥